कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ प्रथम काण्डे प्रथमः प्रश्नः॥

हरिः ओम्॥ इ॒षे त्वो॒र्जे त्वा॑ वा॒यवः॑ स्थोपा॒यवः॑ स्थ दे॒वो वः॑ सवि॒ता प्रार्प॑यतु श्रे॒ष्ठत॑माय॒ कर्म॑ण॒ आ प्या॑यध्वमघ्निया देवभा॒गमू॒र्जस्वतीः॑ पय॒स्वतीः॑ प्र॒जाव॑तीरनमी॒वा अ॑यक्ष्मा मा वः॑ स्ते॒न ई॑शत॒ माऽघश॑ग्ंसो रु॒द्रस्य॑ हे॒तिः परि॑ वो वृणक्तु ध्रु॒वा अ॒स्मिन्गो॑पतौ स्यात ब॒ह्वीर्यज॑मानस्य प॒शून् पा॑हि॥[१]

इ॒षे त्रिच॑त्वारिग्ंशत्॥1.1.1॥

य॒ज्ञस्य॑ घो॒षद॑सि प्र॒त्यु॒ष्टग्ं रक्षः॑ प्रत्यु॒ष्टा अ॑रा॒तयः॑ प्रे॒यमगा॒द्द्विष॑णा ब॒र्हिरच्छ॑ मनु॒ना कृ॒ता स्व॒धया॑ वितष्टा त आ व॑हन्ति क॒वयः॑ पु॒रस्ता॒द्देवे॑भ्यो जु॒ष्टमि॒ह ब॒र्हिरा स॑दे दे॒वाना॑ं परिषू॒तम॑सि व॒र्षवृ॑द्धमसि॒ देव॑बर्हिर्मा त्वाऽन्वङ्मा तिर्यक्पर्व ते राध्यासमाच्छेत्ता ते मा रिषं देवबर्हिः श॒तव॑ल्शं वि रो॑ह सहस्र॒व॑ल्शा [२] वि वय॑ग्ं रुहेम पृथि॒व्याः सं॑पृ॒चः पा॑हि सु॒सं॑भृता त्वा संभराम्यदित्यै रास्नाऽसीन्द्रा॒ण्यै स॒न्नह॑नं पू॒षा ते॑ ग्रन्थिं ग्रथ्नातु स ते॑ माऽऽस्थादिन्द्र॒स्य त्वा॑ बा॒हुभ्या॒मुद्य॑च्छे बृह॒स्पते॒र्मूर्ध्ना॑ ह॒राम्यु॒र्वन्तरि॑क्षमन्वि॒हि दे॒व॒ग॒म॒म॒सि॥[३]

स॒ह॒स्र॒व॑ल्शा अ॒ष्टात्रिग्ं॑शच्च॥1.1.2॥

शु॒न्ध॒ध्वं दैव्या॑य॒ कर्म॑णे देवय॒ज्यायै॑ मातरिश्वनो घ॒र्मोऽसि॒ द्यौर॑सि पृथि॒व्यसि

विश्वधाया असि परमेण धाम्ना दृग्ंहस्व मा ह्वार्वसूनां पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारग्ं हुतः स्तोको हुतो द्रप्सोऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्याग्ं सा विश्वायुः सा विश्वव्यचाः सा विश्वकर्मा सं पृच्यध्वमृतावरी रूर्मिणीर्मधुमत्तमा मन्द्रा धनस्य सातये सोमेन त्वाऽऽतनच्मीन्द्राय दधि विष्णो हव्यग्ं रक्षस्व॥[४]

सोमेनाऽष्टौ च॥1.1.3॥

कर्मणे वां देवेभ्यः शकेयं वेषाय त्वा प्रत्युष्टग्ं रक्षः प्रत्युष्टा अरातयो धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वामस्त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतममह्नुतमसि हविर्धानं दृग्ंहस्व मा ह्वार्मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा सं विक्था मा त्वा [५] हिग्ंसिषमुरु वाताय देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपाम्यग्नीषोमाभ्यामिदं देवानामिदमु नः सह स्फात्यै त्वा नाऽरात्यै सुवरभि वि ख्येषं वैश्वानरं ज्योतिर्दृग्ंहन्तां दुर्या द्यावा पृथिव्योरुर्वन्तरिक्षमन्विह्यदित्यास्त्वोपस्थे सादयाम्यग्ने हव्यग्ं रक्षस्व॥[६]

मा त्वा षट्चत्वारिग्ंशच्च॥1.1.4॥

देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरापो देवीरग्रेपुवो अग्रेगुवोऽग्र इमं यज्ञं नयताग्रे यज्ञपतिं धत्त युष्मानिन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिताः स्थाऽग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्याग्ं

शुन्धध्वं दैव्याय कर्मणे देवयज्याया अवधूतग्ं रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रति त्वा [७] पृथिवी वेत्त्वधिषवणमसि वानस्पत्यं प्रति त्वाऽदित्यास्त्वग्वेत्त्वग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णाम्यद्रिरसि वानस्पत्यः स इदं देवेभ्यो हव्यग्ं सुशमि शमिष्वेषमा वदोर्जमा वद द्युमद्वदत वयग्ं सङ्घातं जेष्म वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु परापूतग्ं रक्षः परापूता अरातयो रक्षसां भागोऽसि वायुर्वो वि विनक्तु देवो वः सविता हिरण्यपाणिः प्रति गृह्णातु॥[८]

त्वा भाग एकादश च॥1.1.5॥

अवधूतग्ं रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रति त्वा पृथिवी वेत्तु दिवः स्कम्भनिरसि प्रति त्वाऽदित्यास्त्वग्वेत्तु धिषणाऽसि पर्वत्या प्रति त्वा दिवः स्कम्भनिर्वेत्तु धिषणाऽसि पार्वतेयी प्रति त्वा पर्वतिर्वेत्तु देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामधि वपामि धान्यमसि धिनुहि देवान्प्राणाय त्वाऽपानाय त्वा व्यानाय त्वा दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रति गृह्णातु॥[९]

प्राणाय त्वा पञ्चदश च॥1.1.6॥

धृष्टिरसि ब्रह्म यच्छाऽपाऽग्नेऽग्निमामादं जहि निष्क्रव्यादग्ं सेधाऽऽदेवयजं वह निर्दग्धग्ं रक्षो निर्दग्धा अरातयो ध्रुवमसि पृथिवीं दृग्ंहायुर्दृग्ंह प्रजां दृग्ंह सजातानस्मै यजमानाय पर्यूह धर्त्र मस्यन्तरिक्षं दृग्ंह प्राणं दृग्ंहाऽपानं दृग्ंह सजातानस्मै यजमानाय पर्यूह धरुणमसि दिवं दृग्ंह चक्षुः [१०] दृग्ंह श्रोत्रं दृग्ंह

सजातानस्मै यजमानाय पर्यूह धर्मासि दिशो दृग्ंह योनिं दृग्ंह प्रजां दृग्ंह सजातानस्मै यजमानाय पर्यूह चितः स्थ प्रजामस्मै रयिमस्मै सजातानस्मै यजमानाय पर्यूह भृगूणामङ्गिरसां तपसा तप्यध्वं यानि घर्मे कपालान्युपचिन्वन्ति वेधसः। पूष्णस्तान्यपि व्रत इन्द्रवायू वि मुञ्चताम्॥[११]

चक्षुरष्टाचत्वारिग्ंशच्च॥1.1.7॥

सं वपामि समापो अद्भिरग्मत समोषधयो रसेन सग्ं रेवतीर्जगतीभिर्मधुमतीर्मधुमतीभिः सृज्यध्वमद्भ्यः परि प्रजाताः स्थ समद्भिः पृच्यध्वं जनयत्यै त्वा सं यौम्यग्नये त्वाऽग्नीषोमाभ्यां मखस्य शिरोऽसि घर्मोऽसि विश्वायुरुरु प्रथस्वोरु ते यज्ञपतिः प्रथतां त्वचं गृह्णीष्वाऽन्तरितग्ं रक्षोऽन्तरिता अरातयो देवस्त्वा सविता श्रपयतु वर्षिष्ठे अधि नाकेऽग्निस्ते तनुवं माऽति धागग्ने हव्यग्ं रक्षस्व सं ब्रह्मणा पृच्यस्वैकताय स्वाहा द्विताय स्वाहा त्रिताय स्वाहा॥[१२]

सविता द्वाविग्ंशतिश्च॥1.1.8॥

आ ददे इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजाः पृथिवि देवयजन्योषध्यास्ते मूलं मा हिग्ंसिषमपहतोऽररुः पृथिव्यै व्रजं गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगपहतोऽररुः पृथिव्यै देवयजन्यै व्रजं [१३] गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगपहतोऽररुः पृथिव्या अदेवयजनो व्रजं गच्छ गोस्थानं

वर्षतु ते द्यौर्बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा [१४] मौगररुस्ते दिवं मा स्कान् वसवस्त्वा परि गृह्णन्तु गायत्रेण छन्दसा रुद्रास्त्वा परि गृह्णन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वा परि गृह्णन्तु जागतेन छन्दसा देवस्य सवितुः सवे कर्म कृण्वन्ति वेधस ऋतमस्यृतसदनमस्यृतश्रीरसि धा असि स्वधा अस्युर्वी चासि वस्वी चासि पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीरदानुर्यामैरयञ्चन्द्रमसि स्वधाभिस्तां धीरासो अनुदृश्य यजन्ते॥[१५]

देवयजन्यै व्रजं तमतो मा विरप्शिन्नेकादश च॥1.1.9॥

प्रत्युष्टग्ं रक्षः प्रत्युष्टा अरातयोऽग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामि गोष्ठं मा निर्मृक्षं वाजिनं त्वा सपत्नसाहग्ं सं मार्ज्मि वाचं प्राणं चक्षुः श्रोत्रं प्रजां योनिं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीग्ं सं माज्म्र्याशासाना सौमनसं प्रजाग्ं सौभाग्यं तनूम्। अग्नेरनुव्रता भूत्वा सं नह्ये सुकृताय कम्॥ सुप्रजसस्त्वा वयग्ं सुपत्नीरुप [१६] सेदिम। अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्॥ इमं वि ष्यामि वरुणस्य पाशं यमबध्नीत सविता सुकेतः। धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि॥ समायुषा सं प्रजया समग्ने वर्चसा पुनः। सं पत्नी पत्याऽहं गच्छे समात्मा तनुवा मम॥ महीनां पयोऽस्योषधीनाग्ं रसस्तस्य तेऽक्षीयमाणस्य नि [१७] र्वपामि महीनां पयोऽस्योषधीनाग्ं रसोऽदब्धेन त्वा चक्षुषाऽवेक्षे सुप्रजास्त्वाय तेजोऽसि तेजोऽनु प्रेह्यग्निस्ते तेजो मा वि नैदग्नेर्जिह्वासि सुभूर्देवानां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे भव शुक्रमसि ज्योतिरसि तेजोऽसि देवो वः सवितोत्पुनात्वच्छिद्रेण

पवित्रेण वसोः सूर्यस्य रश्मिभिः शुक्रं त्वा शुक्रायां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि ज्योतिस्त्वा ज्योतिष्यर्चिस्त्वाऽर्चिषि धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि॥[१८]

उप नी रश्मिभिश्शुक्रꣳ षोडश च॥1.1.10॥

कृष्णोऽस्याखरेष्ठोऽग्नये त्वा स्वाहा वेदिरसि बर्हिषे त्वा स्वाहा बर्हिरसि स्रुग्भ्यस्त्वा स्वाहा दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा स्वधा पितृभ्य ऊर्ग्भव बर्हिषध्व्य ऊर्जा पृथिवीं गच्छत विष्णोः स्तूपोऽस्यूर्णाम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यो गन्धर्वोऽसि विश्वावसुर्विश्वस्मादीषतो यजमानस्य परिधिरिड ईडित इन्द्रस्य बाहुरसि [१९] दक्षिणो यजमानस्य परिधिरिड ईडितो मित्रावरुणौ त्वोत्तरतः परि धत्तां ध्रुवेण धर्मणा यजमानस्य परिधिरिड ईडितः सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्या वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमह्यग्ने बृहन्तमध्वरे विशो यन्त्रे स्थो वसूनाꣳ रुद्राणामादित्यानाꣳ सदसि सीद जुहूरुपभृद्ध्रुवाऽसि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीदैता असदन्थ्सुकृतस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियम्॥[२०]

बाहुरसि प्रिये सदसि पञ्चदश च॥1.1.11॥

भुवनमसि वि प्रथस्वाऽग्ने यष्टरिदं नमः। जुह्वेह्यग्निस्त्वा ह्वयति देवयज्याया उपभृदेहि देवस्त्वा सविता ह्वयति देवयज्याया अग्नाविष्णू मा वामव क्रमिषं वि जिहाथां मा मा सं ताप्तं लोकं मे लोककृतौ कृणुतं विष्णोः स्थानमसीत इन्द्रो

अकृणोद्वीर्याणि समारभ्योर्ध्वो अध्वरो दिविस्पृशमहुतो यज्ञो यज्ञपतेरिन्द्रावान्थ्स्वाहा बृहद्भाः पाहि माऽग्ने दुश्चरितादा मा सुचरिते भज मखस्य शिरोऽसि सं ज्योतिषा ज्योतिरङ्काम्॥[२१]

अहुत एकविग्ंशतिश्च॥1.1.12॥

वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत्। अथा सपत्नाग्ं इन्द्रो मे निग्राभेणाधराग्ं अकः॥ उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्न्। अथा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम्॥ वसुभ्यस्त्वा रुद्रेभ्यस्त्वाऽऽदित्येभ्यस्त्वाऽक्तग्ं रिहाणा वियन्तु वयः। प्रजां योनिं मा निर्मृक्षमा प्यायन्तामाप ओषधयो मरुतां पृषतयः स्थ दिवं [२२] गच्छ ततो नो वृष्टिमेरय। आयुष्पा अग्नेऽस्यायुर्मे पाहि चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि ध्रुवाऽसि यं परिधिं पर्यधत्था अग्ने देव पणिभिर्वीयमाणः। तं त एतमनु जोषं भरामि नेदेष त्वदपचेतयातै यज्ञस्य पाथ उप समितग्ं सग्ग्स्रावभागाः स्थेषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च [२३] देवा इमां वाचमभि विश्वे गृणन्त आसद्याऽस्मिन्बर्हिषि मादयध्वमग्नेर्वामपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनी सुम्ने मा धत्तं धुरि धुर्यौ पातमग्नेऽदब्धायोऽशीततनो पाहि माऽद्य दिवः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै पाहि दुश्चरितादविषं नः पितुं कृणु सुषदा योनिग्ग् स्वाहा देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत इमं नो देव देवेषु यज्ञग्ग् स्वाहा वाचि स्वाहा वाते धाः॥[२४]

दिवं च वित्वा गातुं त्रयोदश च॥1.1.13॥

उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै। उभा दातारविषाग्ं रयीणामुभा वाजस्य सातये हुवे वाम्॥ अश्रवग्ं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात्। अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम्॥ इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम्। साकमेकेन कर्मणा॥ शुचिं नु स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम्। [२५] उभा हि वाग्ं सुहवा जोहवीमि ता वाजग्ं सद्य उशते धेष्ठा॥ वयमु त्वा पथस्पते रथं न वाजसातये। धिये पूषन्नयुज्महि॥ पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानडर्कम्। स नो रासच्छुरुधश्चन्द्राग्रा धियंधियग्ं सीषधाति प्र पूषा॥ क्षेत्रस्य पतिना वयग्ं हितेनेव जयामसि। गामश्वं पोषयित्न्वा स नो [२६] मृडातीदृशे॥ क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व। मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृडयन्तु॥ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम॥ आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनु प्रवोढुम्। अग्निर्विद्वान्थ्स यजा [२७] थ्सेदु होता सो अध्वरान्थ्स ऋतून्कल्पयाति॥ यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो। महिषीव त्वद्रयिस्त्वद्वाजाउदीरते॥ अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः॥ यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः। अग्निष्टद्विश्वमा पृणाति विद्वान् येभिर्देवाग्ं ऋतुभिः कल्पयाति॥[२८]

जुषेथामा सनो यजादा त्रयोविग्ंशतिश्च॥1.1.14॥

इषे त्वा यज्ञस्य शुन्धध्वं कर्मणे वां देवोऽवधूतं धृष्टिस्सं वपाम्या ददे प्रत्युष्टं कृष्णोसि भुवनमसि

वाजस्योभा वां चतुर्दश ॥14॥

इषे दृग्ंह भुवनमष्टाविग्ंशतिः ॥28॥

इषे त्वा कल्पयाति॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति प्रथमकाण्डे प्रथमः प्रश्नः॥